॥ श्रीः ॥

रांची विश्वविद्यालय
RANCHI UNIVERSITY

"पञ्चसहस्रसुभाषितानां मानवजीवनपरिवर्तने प्रभावः" एकं विशिष्टमध्ययनम्

"A special study on an influence of five thousand verses (सुभाषितानि) in changing of human life"

रांचिविश्वविद्यालयस्य मानविकीसङ्कायान्तर्गत डी.लिट.(विद्यावाचस्पतिः) उपाधये प्रस्तुतः

शोधप्रस्तावः -The Proposal

Proposed for the award of D.Litt. Degree at

Ranchi University, Ranchi, Jharkhand-834001

मार्गदर्शिका
प्रॉ. अर्चनाकुमारी दुबे
मानविकीसङ्कायाध्यक्षा
रांचिविश्वविद्यालयः
झारखण्डः

गवेषकः
डॉ. राजेशभाई एच. जोषी
अध्यक्षः
संस्कृतसंस्कृतिसंस्थानम्
दहानु रोड
महाराष्ट्रम्

शोधप्रबन्धप्रारूपम्

विषयानुक्रमणिका

क्रमः	विषयः	पृष्ठक्रमः
१	प्रास्ताविकम्	०३
२	संस्कृतवाङ्मयस्य दिङ्मात्रपरिचयः	०३
३	सुभाषितानां व्युत्पन्नार्थः महत्त्वं च	०४
४	मानवजीवने सुभाषितानां प्रभावः	०४
५	संशोधनस्य प्रकरणविभाजनम्	६-७
	❖ वैदिकवाङ्मयस्य परिचयः। ❖ लौकिकवाङ्मयस्य परिचयः। ❖ पुराणवाङ्मयस्य परिचयः। ❖ सुभाषितानां मानवजीवने प्रभावः। ❖ सुभाषितदृष्ट्या मानवजीवने मूल्यशिक्षणम् ❖ अध्ययनस्यास्य शोधसारांशः ❖ सन्दर्भग्रन्थसूचिः जालस्थानञ्च	
६	अध्ययनस्योद्देश्यं प्रेरणास्रोतश्च	८
७	अध्ययनस्य परिकल्पना	९
८	संशोधनक्षेत्रं संशोधनसाधनानि च	१०
९	अध्ययनस्य आवश्यकता	१०
१०	भावि-अध्ययनस्य सम्भावना	११
११	संशोधनस्यावधिः उपसंहारश्च	११
१२	सन्दर्भग्रन्थाः	१२

***

- **प्रास्ताविकम्**

शारदाशारदाम्भोजवदनावदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधि सन्निधिं क्रियात् ॥

सरस्वतीप्रसादाल्लोकत्रयमिदं प्रकाशयुक्तं तेजोमयं विद्याविनयसंपन्नं च प्रतिभाति । सा च शारदा अस्माकं सर्वेषां जीवने हर्षोल्लासं समुन्नयेदित्येव मनसा प्रार्थये । ईश्वरप्रदत्तमिदं मानवजीवनमस्माकं लोकेऽस्मिन्नितान्तं महत्त्वं विदधाति । यतो हि मानवजीवनमेव स्वाचारविचारैः सर्वेषां कृते प्रेरणाप्रदं भवितुं शक्नोति। भाषामाध्यमेन मनुष्यः सरलतया विचाराणां परस्परम् आदानप्रदानं कर्तुमर्हति। भाषैव सा शक्तिः यया मनुष्यः पशुतो भिद्यते। सम्यक् कृतत्वात् सैव संस्कृतभाषेति नाम्ना विलसिता वर्तते।

- **संस्कृतवाङ्मयस्य दिङ्मात्रपरिचयः ।**

भारतीयसंस्कृतिसंस्कारयोः मूलं यदि कुत्रचिदस्ति चेत् संस्कृतवाङ्मये तन्निहितं वर्तते। विश्वस्मिन् भारतीयायाः संस्कृत्याः संस्काराणां च प्रशस्तिः अस्ति तस्य मूलं कारणं संस्कृतवाङ्गमयं विद्यते। संस्कृतं नाम वेदोपवेदाः पुराणोपुराणानि रामायणं महाभारतं वेदान्तं वेदाङ्गं च। एतैः सद्ग्रन्थैः शाखोपशाखैः संस्कृतवृक्षः वटवृक्षमिव व्यापृतः प्रतीयते। संस्कृते 'का संस्कृतिः?' तदभिव्यक्तं भवति संस्कारैः। तच्च संस्काराणां महत्त्वं वैदिकमन्त्रेषु सुभाषितेषु च निहितं वर्तते। तत्रापि सुभाषितानि तु भारतीयसनातनसंस्कृतेः पञ्चप्राणाः सन्ति। वेदादिशास्त्राणि तीर्थधामानि साधवः सन्तः मन्दिराणि गावः वृक्षाश्च एतैः विभूषितेयं संस्कृतिः तावच्चिरन्तना न भवति यावत् सुभाषितानि न विलसन्ति।

- **सुभाषितानां व्युत्पन्नार्थः महत्त्वं च।**

सु उपसर्गपूर्वकं भाष् धातोः कर्मणिभूतकृदन्तस्य 'क्त' प्रत्ययेन निष्पन्नः शब्दोऽयं सुष्ठु भाषितम् इति सन्दर्भे संस्कृतसंस्कृतिभ्यां परिपुष्टो भवति। मानवजीवने शिक्षारम्भादेव एषां सुभाषितानां संस्कारसेचने मूल्यशिक्षणे चैव अतीव महत्त्वं वर्तते। उक्तं च यथा-

"द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता।

सुभाषितरसस्याग्रे सुधा भीता दिवङ्गता" ॥[1]

सर्वेऽपि जीवाः संस्कारेण सुसंस्कृताः द्विजत्वधर्मैः संपोषकाश्च भवन्ति। संस्कृतवाङ्मयं कीदृशं समृद्धं विशालम् उपासनाज्ञानकर्मकाण्डैश्च प्रेरणाप्रदमस्ति तद् ऋषीणां मुनीनां त्रिकालदर्शित्वम् ऋषित्वं सिद्ध्यति। महापुरुषाणां चिन्तनात्मिका दृष्टिः धार्मिकदृष्ट्या आध्यात्मिकदृष्ट्या पारमार्थिकदृष्ट्या तात्त्विकदृष्ट्या किं प्रेरयति तत् तावत् कालपर्यन्तं ज्ञातुं न शक्यते यावत् कालपर्यन्तं शास्त्राणि न जीव्यन्ते। मानवजीवनव्यवहारे शास्त्राणि मनोवैज्ञानिकानि स्वास्थ्यलाभकराणि संवादपूर्णानि सर्वविधलाभकराणि च सन्ति तत् सुभाषितैः ज्ञातुं शक्यते।

- **मानवजीवने सुभाषितानां प्रभावः।**

संस्कृतवाङ्गमये लौकिकवाङ्मयादारभ्य आधुनिकसुभाषितग्रन्थान् यावत् मानवजीवने मूल्यं प्रकाशयितुं यावन्तः ग्रन्थाः विलसन्ति तेषु सर्वेषु ग्रन्थेषु सुभाषितानां सङ्ख्या भिन्ना भिन्ना अस्ति। यतो हि एतेषां सुभाषितानां कश्चिदेको ग्रन्थो न विद्यते। कालान्तरेण नैके विद्वांसः स्वीयेषु ग्रन्थेषु स्वतन्त्ररूपेण यानि मुक्तकानि रचयन्ति तानि एव सुभाषितनाम्ना व्यवह्रियते। एतानि सुभाषितानि घटे समुद्रमिव ज्ञानं विदधति। मानवजीवने मूल्यानां सेचनाय एतानि रत्नानीव विलसन्ति। तद्यथा-

"पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते" ॥[2]

किन्तु सर्वेषां सुभाषितानां पृष्ठे कः पारमार्थिकः लाभः तदाद्योपान्ततया केनापि ज्ञातुं न शक्यते। यथा यथा मानवजीवने समये समये विविधमूल्यानां सेचनं भवति तथा तथा कालक्रमेण एतज्ज्ञातुं शक्यते। जीवनमूल्यसेचनेऽपि एक उदात्तभावो नितान्तं मानवकल्याणं कर्तुं ऋषिभिः कविभिः विद्वद्भिश्च प्रेरितो वर्तते। तर्हि कानि च तानि मूल्यानि इति प्रश्ने जाते सति एवं प्रस्तूयते यथा –

सामाजिकं मानवीयं नैतिकं व्यावहारिकम् ।

राजकीयं पञ्चविधं मूल्यमेतन्मतं मम ॥

एतेषां जीवनमूल्यानां पृष्ठभूमिः अस्माकं नैकेषु शास्त्रेषु सुभाषितरूपेण परिणिता भवति। तत्तच्छास्त्ररहस्यमद्यावधि पूर्णतया न केनापि ज्ञातम्। यथा-

"श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्ना नैकोमुनिर्यस्य वचः प्रमाणम्।

धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः"॥[3]

विधिपूर्वकं तदेतेषां सुभाषितानां परिपालनं सश्रद्धं क्रियते चेत् सम्पूर्णं शास्त्रीयप्रमाणभूतं मूल्यशिक्षणफलं लभ्यते एव इति ऋषीणां विश्वासः। यद्धि सुभाषितेषु विचारवैविध्यं दरीदृश्यते तथापि देशकालौ सङ्कीर्त्य तत्फलश्रुतौ सर्वेषां मुनीनां विदुषां महापुरुषाणां च मनसः ऐक्यं सर्वत्र सर्वदा विलसति।

अत्र संशोधनेन संस्कृतवाङ्मयस्य जीवनमूल्यप्रतिपादकानां सद्ग्रन्थानां तात्त्विकदृष्ट्या परिशीलनं कृत्वा मानवसमाजे किमेतेषां मूल्यानां प्रयोजनं तत्प्रमाणपुरस्सरं प्रतिपाद्य ऋषीणां मुनीनां पुरुषार्थं सफलं कर्तुं नम्रः प्रयासः विधास्यते।

प्रकरणविभाजनम्

❖ **प्रथमप्रकरणम् – वैदिकवाङ्मयस्य परिचयः ।**

१.१ वैदिकवाङ्मयम्।

१.१.१ ऋग्वेदः।

१.१.२ यजुर्वेदः।

१.१.३ सामवेदः।

१.१.४ अथर्ववेदः।

१.२ ब्राह्मणवाङ्मयम्।

१.२.१ ऋग्वेदस्य ब्राह्मणम्।

१.२.२ यजुर्वेदस्य ब्राह्मणम्।

१.२.३ सामवेदस्य ब्राह्मणम्।

१.२.४ अथर्ववेदस्य ब्राहमणम्।

१.३ आरण्यकवाङ्मयम्।

१.३.१ ऐतरेयारण्यकम्

१.३.२ शांखायानारण्यकम्

१.३.३ तैत्तरीयारण्यकम्

१.३.४ बृहदारण्यकम्

१.४ उपनिषद्वाङ्मयम्।

१.४.१ उपनिषद्-स्वरूपम्

१.४.२ उपनिषद्-परिभाषा

१.४.३ उपनिषद्-नामानि

१.४.४ उपनिषदां संक्षिप्तपरिचयः

❖ **द्वितीयप्रकरणम् – लौकिकवाङ्मयस्य परिचयः ।**

२.१ दृश्यकाव्यम् (नाटकानि)

२.१.१ दृश्यकाव्य-स्वरूपम्

२.१.२ दृश्यकाव्य-परिभाषा

२.१.३ दृश्यकाव्य-नामानि

२.१.४ दृश्यकाव्यानां संक्षिप्तपरिचयः

२.२ श्रव्यकाव्यम्

२.२.१ श्रव्यकाव्य-स्वरूपम्

२.२.२ श्रव्यकाव्य-परिभाषा

२.२.३ श्रव्यकाव्य-नामानि

२.२.४ श्रव्यकाव्यानां संक्षिप्तपरिचयः

२.३ स्मृतयः
२.३.१ स्मृतिशास्त्र-स्वरूपम्
२.३.२ स्मृतिशास्त्र-परिभाषा
२.३.३ स्मृतिशास्त्र-नामानि
२.३.४ स्मृतीनां संक्षिप्तपरिचयः
२.४ पुराणानि
२.४.१ पुराणशास्त्र-स्वरूपम्
२.४.२ पुराणशास्त्र-परिभाषा
२.४.३ पुराणशास्त्र-नामानि
२.४.४ पुराणानां संक्षिप्तपरिचयः

❖ **तृतीयप्रकरणम् - पुराणवाङ्मयस्य परिचयः।**
३.१ पुराणनामानि
३.२ पुराणविषयाः
३.३ पुराणवैशिष्ट्यम्
३.४ पुराणेषु सुभाषितानि
३.५ सुभाषितमहत्त्वम्

❖ **चतुर्थप्रकरणम् - सुभाषितानां मानवजीवने प्रभावः**
४.१ सुभाषित-स्वरूपम्
४.२ सुभाषित-परिभाषा
४.३ सुभाषित-वैविध्यम्
४.४ सुभाषितानां प्रभावः

❖ **पञ्चमप्रकरणम् – सुभाषितदृष्ट्या मानवजीवने मूल्यशिक्षणम्**
५.१ सुभाषितानां सामाजिकमूल्यम्
५.२ सुभाषितानां मानवीययमूल्यम्
५.३ सुभाषितानां नैतिकमूल्यम्
५.४ सुभाषितानां व्यावहारिकमूल्यम्
५.५ सुभाषितानां राजकीयमूल्यम्

❖ **षष्ठप्रकरणम् – अध्ययनस्यास्य शोधसारांशः**

❖ **सन्दर्भग्रन्थसूचिः जालस्थानञ्च ।**

- **अध्ययनस्योद्देश्यं प्रेरणास्रोतश्च ।**

राष्ट्रियशिक्षानीत्यां(२०२०) भारतीयज्ञानपरम्परायाः एकः विशिष्टः आदरः प्रतिपादितो वर्तते। केन कारणेन सः आदरः प्रदर्शितः ? केन कारणेन भारतस्य भारतत्वं सिद्ध्यति ? तज्ज्ञानाधारेणैव सिद्धं कर्तुं विषयोऽयं चितः वर्तते। भा दिप्तौ ज्ञानपूर्णप्रतिभायां रतः इति कृत्वा भारतः। तत्तादृशं ज्ञानं किम्? तर्हि अमूल्यमिदं मानवजीवनं मूल्ययुक्तं भावयितुं तज्ज्ञानप्रतिपादकनि सुभाषितानि भारतस्य भारतत्वं सिद्धं कुर्वाणानि सन्ति।

विश्वयोगदिवसेन यथा भारतीयैः योगमहत्त्वं ज्ञातं तत्पूर्वमपि भारतदेशसमुत्पन्नेन पतञ्जलिना योगशास्त्रं तु दत्तमेवासीत् किन्तु वैश्विकी प्रतिष्ठा योगदिवसेन मुनिना पतञ्जलिना सम्प्राप्ता। एतादृशमेव सुभाषितानां विषये अस्माकं न भवेत् तत्पूर्वमनेन संशोधनेन भारतीयसमाजः स्वजीवने मूल्यानां महत्त्वविषये जागरूको भवेदित्येकः शुभसङ्कल्पोऽस्ति। आदर्शसमाजनिर्माणाय विश्वबधुत्वभावनां निर्मातुं 'विश्वं भवत्येकनीडम्', 'वसुधैव कुटुम्बकम्' इत्यादीनि वाक्यानि सफलीकर्तुं विविधाः योजनाः स्पर्धाः परिपत्राणि चेति सर्वं भवति किन्तु ऋषिमुनिकविभिश्च प्रणीतेषु सुभाषितेषु अहं दृढं विश्वसिमि यत् मूल्यानां संस्कारसेचनेन संस्कृतिः यावत् कार्यान्विता न भविष्यति तावदाभ्यान्तरजगतः उत्कृष्टः सद्भावः न समुदेष्यति। ऋषीणां कवीनां विदुषां च चिन्तनं कीदृशमासीत्? कया रीत्या जीवनं यापयित्वा, कन्दमूलानि भुक्त्वा, तपः कृत्वा, परिश्रमपूर्वकं विद्याभ्यासं च कृत्वा संसाराय समाजाय जगते सद्ग्रन्थाः प्रदत्ताश्च सन्ति तदनेन संशोधनेन परिचयितुमीहे।

इदं संशोधनं समाजतोषणाय तु भवेदेव किन्तु तेन सह ऋषितर्पणाय शोधस्यास्य समर्पणं भविता, अर्थादनेन संशोधनेन ऋषिभ्यः मुनिभ्यः कविभ्यश्च अर्घ्यप्रदानात्मकं कर्म भविष्यति। कश्चिदेकः परिवारः समवायो वा सुभाषितानां सुविस्तृतं परिचयं चिन्तनं ज्ञात्वा पठित्वा कार्यान्वितो भविष्यति चेदपि तस्य परिवारस्य समवायस्य समुदायस्य च जनाः मूल्यशिक्षणेन परितृप्ताः भविष्यन्ति इति

उदात्तभावनया भगवत्कृपया गुरोरनुग्रहेण विषयोऽयं चितोऽस्ति। भारतीयग्रन्थान् प्रति जनानामादरः समादरः भवेत् तदप्येकं प्रयोजनमस्ति।

"धर्मार्थ उत्तमश्लोकम्"[4] इति भगवतः वेदव्यासस्य वचनमनुसृत्य भगवतः परमानुकम्पया प्रेरणया शोधप्रबन्धोऽयं मानवसमाजोपकारको भवेदिति धिया विषयस्यालोडनं संस्कृतवाङ्मयदृष्ट्या भविष्यति।

- **अध्ययनस्य परिकल्पना**

संस्कृतवाङ्गमये विद्याविद्ये इति द्वौ भागौ स्तः। यथोक्तम्-

"विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते"[5]॥

संस्कृतवाङ्मये निर्दिष्टानां मूल्यानां सिद्धान्तानां च क्रियान्वयनं कर्तुं प्रयोगशालारूपेण समाजः एव वर्तते। तत्रापि विधिपूर्वकं संस्काराणां क्रियान्वयनं न जडपदार्थेषु अपि तु चेतनतत्त्वेषु प्रयोगविधिः भवति फलश्रुतिरूपेण जडात्मिकासृष्टिरपि लाभान्विता भवति। आगमनिगमनाभ्यां पद्धतिभ्यामभ्यासैः स्वाध्यायेन पूर्वसंशोधनानाम् आधारेण महापुरुषाणां कथाप्रवचनैः भारतीयसमाजे जीवनमूल्यानां वैश्विकचिन्तनेन परिशीलनेन समालोचनेन विशिष्टाध्ययनेन च विषयस्यास्य चितन्तपूर्वकोऽभ्यासो भविष्यति। संस्कृतभाषायां संशोधनं कर्तुं याः पद्धतयः परिकल्पनाः प्रदत्तास्सन्ति तत्र विशेषतः **"महाजनो येन गतः स पन्थाः"** इति न्यायेन भवति, अपि च द्वितीयं पुराणस्यैका पद्धतिरस्ति अन्वयात्मिका व्यतिरेकात्मिका च। आभ्यां द्वाभ्यां परिशीलनं कृत्वा समीक्षणं कृत्वा कार्यमिदं भविष्यति। अत्र मुख्यतया सुभाषितानां ब्राहमण-क्षत्रिय-वैश्य-शूद्रादिवर्णाश्रमयुतं सामाजिकमूल्यम्, मातृ-पितृ-भातृ-स्वसृ-गुरु-शिष्यादि-मानवीययमूल्यम्, सदाचारविचारयुक्तं नैतिकमूल्यम्, सदसद्धर्मयुक्तं व्यावहारिकमूल्यम्, संव्यवहारवृद्धिलाभयुक्तं राजकीयमूल्यम् इति विविधमूल्यपरकं संशोधनकार्यमिदं कर्तुं प्रयत्नो भविष्यति।

विद्यया तपसा देवानुग्रहेण संवेदनशीलेषु विषयेषु किमपि अध्येतुं शक्यते। पूर्वजानाम् ऋषीणां चिन्तनं वर्तमानयुगानुसारं वैज्ञानिकमेवासीदिति आधुनिकाः वैज्ञानिकाः निगदन्ति।

- **संशोधनक्षेत्रं संशोधनसाधनानि च ।**

संस्कृतवाङ्मये स्थितानां विषयाणां संशोधनानां च क्षेत्रं प्रयोगशाला च समाज एव भवति। शास्त्राणां सर्जनं शास्त्राणां समुपादेयता मानवजीवनाय मानवकल्याणाय चरमपुरुषार्थरूपेण मोक्षसिद्ध्यै च वर्तते। संशोधनस्यास्य मुख्यविषयत्वेन सुभाषितशब्दोऽस्ति। मानवजीवने मूल्यानां परिपालनेन ऐहिकपारलौकिकलाभो वर्तते। शास्त्राणि न केवलं प्रेयसे अपि तु सर्वथा प्रेयसा सह श्रेयसे अपि भवन्ति। कठोपनिषदि यथोक्तम्- **"श्रेयश्च प्रेयश्च मनुष्यमेतत्"**[6]। शास्त्रेषु निर्दिष्टं संशोधनं चतुरशीतिलक्षपरिमितयोनीनां भद्राय श्रेयसे वर्तते अतः संशोधनक्षेत्रं चतुस्समुद्रपरिखा वसुधास्ति।

वेदादारभ्य वर्तमानकाले सृज्यमानं संस्कृतवाङ्मयं संशोधनस्य साधनभूतं वर्तते। **"वेदोऽखिलो धर्ममूलम्"**[7] इति स्मृत्युक्तवचनं विषयसन्दर्भेऽपि प्रस्तुतं वर्तते। सर्वाणि शास्त्राणि वेदोच्छिष्टान्येवेति कृत्वा शास्त्रेषु समुपलब्धानि सुभाषितानि अपि वेदाधारितान्येव सन्ति। कालक्रमेण विद्वज्जनैः स्वमौलिकतया तान्येव ग्रन्थेषु प्रतिपादितानीति मे मतिः। अतः तत्त्छास्त्रनिगदितानि संस्कृतसुभाषितानि एव संशोधनस्यास्य क्षेत्रं भविष्यति।

- **अध्ययनस्यावश्यकता ।**

वेदेषु प्रार्थनास्ति यत् **असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। इति** । किन्तु कः परिपालयति? शास्त्राध्ययनमकुर्वाणोऽपि जानाति इमानि वचनानि किन्तु प्रयोगे व्यवहारे शून्यत्वमायाति, कारणम् ? जीवनमूल्यानामभावः। उपदेशमदत्वापि इमानि वचनानि पूर्वं जनाः जीवन्ति स्म। कारणम्? विधिपूर्वकं स्वजीवने एतादृशानां जीवनमूल्यानां परिपालनम्। इदानीन्तने काले संशोधनेनानेन सर्वे जनाः एतस्मिन् विषये जागृताः भवेयुः चेत् विंशतिवर्षेभ्योऽनन्तरं सुराष्ट्रनिर्माणं स्वतः भविष्यति। सम्प्रति अपराधरहितस्य समाजस्य महती आवश्यकता वर्तते।

तदर्थमयमेकमेवोपायोऽस्ति जीवनमूल्यविषये जागृतिः। तदर्थं नैकानि सुभाषितानि विद्वद्भिः स्वस्वग्रन्थेषु विरचितानि सन्ति, तैरेव सरलतया सहजतया च मूल्यसेचनं भविष्यतीति मे निश्चिता मतिः। अनेन संशोधनेन तद्दिशि उत्तमं कार्यं भविष्यतीति मन्ये।

- **भावि-अध्ययनस्य सम्भावना।**

संस्कृतवाङ्गमये नैके विषयास्सन्ति। भारतस्य प्राणभूतेषु विषयेषु अन्यं कं विषयमादाय भविष्येऽपि संशोधनं भविष्यति। संशोधनं समाजाभिमुखं भवेत् सामाजिकसमस्यानां निवारणाय च स्यात् , तदैव संशोधनं संशोधनत्वं प्राप्नोति। सुभाषितमाध्यमेन जीवनमूल्यपरकमिदं यथा गम्भीरं चिन्तनमस्ति तद्वदेव आहारविहारसंगतौ, साम्प्रतिकसमाजसमस्यानिवारणकेषु, सदाचरणविषयेषु भक्ष्याभक्ष्यभोजनविचारेष्वपि शास्त्रोक्तचिन्तनावसरास्सन्ति। शास्त्रोक्तानादर्शान् मानवजीवनशैलीं वर्णयितुमपि विषयोऽयं सहायको भविता। इत्थं संशोधनेनानेन वैश्विककल्याणाय अन्ये के विषयास्सन्ति तस्यापि बोधो भविष्यति।

- **संशोधनस्यावधिः उपसंहारश्च।**

विश्वविद्यालयस्य नियमानुसारं न्यूनातिन्यूनो योऽवधिः स च मयात्र रक्षणीयोऽस्ति। भारतदेशस्य ज्ञानवैभवः सुभाषितेषु निहितोऽस्ति तत् सम्पादयितुं प्रतिपादयितुं प्रदातुं समर्पयितुं निवेदयितुं प्रेरयितुं च समुत्सुकोऽहम्।

सर्वेषां सुभाषितान्वितविषययुतानां ग्रन्थानामालोडनपूर्वकं यथाशीघ्रं तपश्चर्यापूर्वकं भगवत्कृपाप्रसादेन विषयोऽयमुपसंहरणीयोऽस्ति।**"आ नो भद्राः क्रतवो यन्तु विश्वतः"** इति श्रुतिवचनमुररीकृत्य प्रकृतिः पुरुषः सद्गुरुः परमात्मा मार्गदर्शकः तथा च मे प्रेयांशाः विषयसन्दर्भे उत्तमं दर्शनं मार्गदर्शनं च दद्युरिति कामये।

अतः मया सानुनयं प्रार्थ्यते यत् विषयमिमम् अधिकृत्य शोधकार्यचिकीर्षवे मह्यम् अनुमतिं दत्वा मामुपकुर्वन्तु।

॥ इति शम् ॥

सन्दर्भग्रन्थाः

[1] सुभाषितपुष्पमाला

[2] सुभाषितरत्नभाण्डागारः

[3] महाभारतम् , वनपर्व (अध्याय १३४, श्लोक ४१), कर्ता- वेदव्यासः,

[4] श्रीमद्भागवतमहापुराणम्, (स्कन्ध २, अध्याय ३, श्लोक ८) कर्ता-वेदव्यासः,

[5] ईशावास्योपनिषद्, मन्त्र-११,

[6] कठोपनिषद्

[7] मनुस्मृतिः (२.६)